अश्वतरः, पुं, वेगसरः। नागराजविशेषः। इति मेदिनी ॥
("कम्बलाश्वतरौ चापि नागकालीयकस्तथा"।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ" ॥
इति च महाभारते ॥ ) गन्धर्व्वविशेषः। पुंवत्सः। इति धरणिः ॥

अश्वत्थः, पुं, (अश्वत्थं जलमस्यास्ति। मूले सिक्तत्वात्। अर्श-आद्यच्। अश्वत्थवत् कामकर्म्मवातेरितनित्यप्रचलितस्वभावत्वात् आशुविनाशित्वेन श्वोऽपि स्थास्यतीति विश्वासानर्हत्वाच्च मायामयः संसारवृक्षः। शाल्मलिवटाद्यपेक्षया न श्वस्थिरं तिष्ठति अश्वइव तिष्ठति वा। स्था गतिनिवृत्तौ। पृषोदरादित्वात् पूर्व्वोत्तरपदान्ताद्योः सकारयोस्तकारौ सुपिस्थ इति कः। ) स्वनामख्यातवृक्षविशेषः। पिपर इति पश्चिमदेशीयभाषा। तत्पर्य्यायः। बोधिद्रुमः २ चलदलः ३ पिप्पलः ४ कुञ्जराशनः ५। इत्यमरः ॥ अच्युतावासः ६ चलपत्रः ७ पवित्रकः ८ शुभदः ९ बोधिवृक्षः १० याज्ञिकः ११ गजभक्षकः १२ श्रीमान् १३ क्षीरद्रुमः १४ विप्रः १५ मङ्गल्यः १६ श्यामलः १७ गुह्यपुष्पः १८ सेव्यः १९ सत्यः २० शुचिद्रुमः २१ धनुवृक्षः २२। अस्य गुणाः। सुमधुरत्वं। कषायत्वं। शीतलत्वं। कफपित्तविनाशित्वं रक्तदाहशमनकारित्वञ्च ॥ तत्पक्वफलस्य गुणाः। सद्यो योनिदोषहारित्वं। शीतलत्वं। अतिहृद्यत्वं। पित्तरक्तविषार्त्तिदाहच्छर्द्दिशोषारुचिदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥
("अश्वत्थोडुम्बरप्लक्षन्यग्रोधानां फलानि च।
कषायमधुराम्लानि वातलानि गुरूणि च" ॥
इति चरकः ॥

"अश्वत्थदेवायतनश्मशान-
वल्मीकसन्ध्यासु चतुष्पथेषु।
याम्ये सपित्रे परिवर्ज्जनीया
ऋक्षे नरा मर्म्मसु ये च दष्टाः" ॥

इति सुश्रुतः ॥ )
अथाश्वत्थवन्दनकालमन्त्राः।
"अश्वत्थं वन्दयेन्नित्यं पूर्व्वाह्णे प्रहरद्वये।
अत ऊर्द्ध्वं न वन्देत अश्वत्थन्तु कदाचन ॥
(ॐ) चक्षुस्पन्दं भुजस्पन्दं तथा दुःस्वप्नदर्शनं।
शत्रूणाञ्च समुत्थानमश्वत्थ शमयास्तु मे ॥
अश्वत्थरूपी भगवान् प्रीयतां मे जनार्द्दनः।
त्वां दृष्ट्वा नश्यते पापं दृष्ट्वा लक्ष्मीः प्रवर्त्तते ॥
प्रदक्षिणे भवेदायुः सदाश्वत्थ नमोऽस्तु ते" ॥
इति स्मृत्यर्थसारे हलायुधधृतवचनं ॥ गर्द्दभाण्डवृक्षः। इति विश्वः ॥
"बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गलाशनः।
पिप्पलो दुर्ज्जरः शीतः पित्तश्लेष्मव्रणास्रजित् ॥
गुरुस्तुवरको रूक्षो वर्ण्यो योनिविशोधनः" ॥*॥
अथ पिप्पलभेदः। गजहण्ड इवि हिन्दिभाषा।
"पारिशोन्यः फलीशश्च कपिचूतः कमण्डलुः।
गर्द्दभाण्डः कन्दरालकपीतनसुपार्श्वकाः ॥
फलीशो दुर्ज्जरः स्निग्धः क्रिमिशुक्रकफप्रदः।
फलेऽम्लमधुरो मूले कषायः स्वादुमज्जकः" ॥ * ॥
अथ वेलियापिप्पलः।
"नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्याद्वनस्पतिः ॥
नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः।
कटुपाकरसो ग्राही विषपित्तकफास्रनुत्" ॥
इति भावप्रकाशः ॥*॥ तस्य विष्णुस्वरूपत्वं यथा,—

ऋषय ऊचुः।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ" ॥
सूत उवाच ॥
"अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
रुद्ररूपो वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवं" ॥
ऋषय ऊचुः।
"कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ संशयोऽत्र महान् हि नः" ॥
सूत उवाच।
"पार्व्वतीशिवयोर्द्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभ्रंशकम्पमाना तदा रुषा" ॥
पार्व्वत्युवाच।
"कृमिकीटादयोऽप्येते जानन्ति सुरतेः सुखं।
तस्मान्मम सुखभ्रंशात् यूयं वृक्षत्वमाप्स्यथ" ॥
सूत उवाच।
"एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥

तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्बोधिवटौ मुनीश्वराः।
बोधिस्त्वयं चार्कदिनं विनैव
न संस्पृशेदर्कजवारयोगात्" ॥

इति पाद्मे उत्तरखण्डे १९० अध्यायः ॥ * ॥
ऋषय ऊचुः।
"अस्पृश्यत्वं कथं जातं सूत बोधितरोः स्वयं।
स्पृश्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे" ॥
सूत उवाच।
"समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः।
श्रेष्ठञ्च कौस्तुभं तेष विष्णवे प्रददुः सुराः ॥
यावदङ्गीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं" ॥
लक्ष्मीरुवाच।
"असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन ॥
विवाह्योद्वाहमां पश्चात् एष धर्म्मः सनातनः।
तस्मात् धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन ॥
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा ॥
आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल।
स्थूलोष्ठीं शुक्लदशनां विरूपां बिभ्रतीं तनुं ॥
खवदारक्तनयनां रूक्षपिङ्गशिरोरुहां।
स मुनिर्व्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमं ॥
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्।
होमधूपसुगन्धाढ्यं वेदघोषेन नादितं ॥
आश्रमं तं विलोक्याथ व्यथिता साब्रवीदिदं।"
ज्येष्ठोवाच।
"नहि वासानुरूपोऽयं वेदध्वनियुतो मम ॥
नाचागमिष्ये भो ब्रह्मन् नयस्वान्यत्र मां ध्रुवं"।
उद्दालक उवाच।
"कथं नायासि किञ्चात्र वर्त्तते स्वमतं तव।
तत्र योग्या च वसतिः का भवेत्तद्वदस्व मां" ॥
ज्येष्ठोवाच।
"वेदध्वनिर्भवेद्यस्मिन् अतिथीनाञ्च पूजनं।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहं ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहं ॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्म्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादवमाननं।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहं" ॥
सूत उवाच।
"इति तद्वचनं श्रुत्वा विसन्नवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह" ॥
उद्दालक उवाच।
"अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मीः अस्यतां क्षणं
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः" ॥
सूत उवाच।
"इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा न तं ददर्श सा ॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता।
तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा"।
लक्ष्मीरुवाच।
"स्वामिन् मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो यद्यहं प्रिया" ॥
सूत उवाच।
"लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्" ॥
विष्णुरुवाच।
"अश्वत्थवृक्षमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अस्पृश्योऽसौ भवेत्तस्मात् मन्दवारं विना किल" ॥
इति पाद्मे उत्तरखण्डे १९१ अध्यायः ॥ २ ॥
वैशाखमासे तस्य सेचनफलं यथा,—
"वैशाखे सिञ्चयेन्नित्यं विष्णुमश्वत्थरूपिणं।
चतुर्वर्गफलावाप्तिहेतवे वैष्णवो जनः ॥
गण्डूषमात्रतोयेन कुर्य्याद्योऽश्वत्थसेचनं।
सोऽपि याति परं स्थानं विमुक्तः पापकोटिभिः ॥
अश्वत्थमूलं विप्रर्षे यो बध्नाति शिलादिभिः।
अश्वत्थरूपी भगवान् किं तस्मै न हि यच्छति ॥
अश्वत्थद्रुममालोक्य प्रणामं कुरुते तु यः।
आयुर्व्वृद्धिर्भवेत्तस्य वर्द्धन्ते सर्व्वसम्पदः ॥